॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## कनकधारा स्तोत्र

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# कनकधारा स्तोत्र

वन्दे वन्दारुमन्दार-मिन्दिरानन्दकन्दलम्
अमन्दानन्दसन्दोह-बन्धुरं सिन्धुराननम् ॥

अंगं हरेः(फ्) पुलकभूषणमाश्रयन्ती ,
भृङ्गाङ्गनेव मुकुलाभरणं(न्) तमालम्।
अङ्गीकृताखिलविभूतिरपाङ्गलीला,
माङ्गल्यदास्तु मम मङ्गलदेवतायाः ॥ 1 ॥

मुग्धा मुहुर्विदधती वदने मुरारेः(फ्),
प्रेमत्रपाप्रणिहितानि गतागतानि।
माला दृशोर्मधुकरीव महोत्पले या,
सा मे श्रियं(न्) दिशतु सागरसम्भवायाः ॥ 2 ॥

विश्वामरेन्द्रपदविभ्रमदानदक्ष-
मानन्दहेतुरधिकं(म्) मुरविद्विषोऽपि।
ईषन्निषीदतु मयि क्षणमीक्षणार्ध-
मिन्दीवरोदरसहोदरमिन्दिरायाः ॥ 3 ॥

आमीलिताक्षमधिगम्य मुदा मुकुन्द-
मानन्दकन्दमनिमेषमनङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं(म्),
भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ 4 ॥

बाह्वन्तरे मधुजितः(श्) श्रितकौस्तुभे या ,
हारावलीव हरिनीलमयी विभाति।

कामप्रदा भगवतोऽपि कटाक्षमाला,
कल्याणमावहतु मे कमलालयायाः ॥ 5 ॥

कालाम्बुदालिललितोरसि कैटभारेर्-
धाराधरे स्फुरति या तडिदङ्गनेव।
मातुः(स्) समस्तजगतां(म्) महनीयमूर्तिर्-
भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ 6 ॥

प्राप्तं(म्) पदं(म्) प्रथमतः(ख्) किल यत्प्रभावान्,
माङ्गल्यभाजि मधुमाथिनि मन्मथेन।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं,
मन्दालसं(ञ्) च मकरालयकन्यकायाः ॥ 7 ॥

दद्याद् दयानुपवनो द्रविणाम्बुधारा-
मस्मिन्नकिंचनविहङ्गशिशौ विषण्णे।
दुष्कर्मघर्ममपनीय चिराय दूरं(न्),
नारायणप्रणयिनीनयनाम्बुवाहः ॥ 8 ॥

इष्टा विशिष्टमतयोऽपि यथा दयार्द्र-
दृष्ट्या त्रिविष्टपपदं(म्) सुलभं(म्) लभन्ते।
दृष्टिः(फ्) प्रहृष्टकमलोदरदीप्तिरिष्टां(म्),
पुष्टिं(ङ्) कृषीष्ट मम पुष्करविष्टरायाः ॥ 9 ॥

गीर्देवतेति गरुडध्वजसुन्दरीति,
शाकम्भरीति शशिशेखरवल्लभेति।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै ,
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ 10 ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै,
रत्यै नमोऽस्तु रमणीयगुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्रनिकेतानायै,
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ 11 ॥

नमोऽस्तु नालीकनिभाननायै,
नमोऽस्तु दुग्धोदधिजन्मभूत्यै ।
नमोऽस्तु सोमामृतसोदरायै,
नमोऽस्तु नारायणवल्लभायै ॥ 12 ॥

नमोऽस्तु हेमाम्बुजपीठिकायै,
नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै,
नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ 13॥

नमोऽस्तु देव्यै भृगुनन्दनायै,
नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै,
नमोऽस्तु दामोदरवल्लभायै ॥ 14॥

नमोऽस्तु कान्त्यै कमलेक्षणायै,
नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभिरर्चितायै,
नमोऽस्तु नन्दात्मजवल्लभायै ॥ 15॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि,
साम्राज्यदानविभवानि सरोरुहाक्षि।

त्वद्वन्दनानि दुरिताहरणोद्यतानि,
मामेव मातरनिशं(ङ्) कलयन्तु मान्ये ॥ 16 ॥

यत्कटाक्षसमुपासनाविधिः(स्),
सेवकस्य सकलार्थसम्पदः।
संतनोति वचनाङ्गमानसैस्-
त्वां(म्) मुरारिहृदयेश्वरीं(म्) भजे ॥ 17 ॥

सरसिजनिलये सरोजहस्ते,
धवलतमां(व्)शुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे,
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ 18 ॥

दिग्घस्तिभिः(ख्) कनककुम्भमुखावसृष्ट-
स्वर्वाहिनीविमलचारुजलप्लुताङ्गीम्।
प्रातर्नमामि जगतां(ञ्) जननीमशेष–
लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ॥ 19 ॥

कमले कमलाक्षवल्लभे त्वं(ङ्),
करुणापूरतरङ्गितैरपाङ्गैः।
अवलोकय मामकिं(ञ्)चनानां(म्),
प्रथमं(म्) पात्रमकृत्रिमं(न्) दयाया : ॥ 20 ॥

देवि प्रसीद जगदीश्वरि लोकमातः(ख्),
कल्यानगात्रि कमलेक्षणजीवनाथे ।

दारिद्र्यभीतिहृदयं शरणागतं मां,
आलोकय प्रतिदिनं सदयैरपाङ्गैः ॥ 21 ॥

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं(न्),
त्रयीमयीं(न्) त्रिभुवनमातरं(म्) रमाम्।
गुणाधिका गुरुतरभाग्यभागिनो,
भवन्ति ते भुवि बुधभाविताशयाः ॥ 22 ॥

॥ इति श्रीमच्छंकराचार्यविरचितं(ङ्) कनकधारास्तोत्रं सम्पूर्णम् ॥